वेद्या मध्यम् अव्ययी० । वेदिमध्ये अव्य० । "अपरास पश्चादुपविशत्यन्तर्वेदि वा कात्या० २,५,११, "अन्तर्वेदि वेद्याः करिष्यमाणायाः प्रदेशो लक्ष्यते तस्य देशस्याभ्यन्तरे उपविशतीति" तद्भा० "अन्यदन्तर्वेदि" कात्या० १३,३,३ । अन्तर्वेदि विहितं कर्म्म ठन् । अन्तर्वैदिकम् अन्तर्वेदिविहिते इष्ट्यादौ कर्म्मणि "नित्यमैष्टिकपौर्त्तिकमिति" मनुवचने ऐष्टिकमन्तर्वैदिकमिति" कूल्लू० ।

**अन्तर्वेदी** स्त्री पृथिव्या मध्यस्थितत्वादन्तर्वेदीव । हरिद्वारावधिप्रयागपर्य्यन्ते शशस्थलीति ब्रह्मावर्त्त इति च ख्याते देशे

**अन्तर्वेशिक** त्रि० अन्तर्वेशे अन्तःपुरे नियुक्तः ठक् संज्ञापूर्व्वकविधेरनित्यत्वात् न वृद्धिः । अन्तःपुररक्षणाय नियुक्ते कञ्चुक्यादौ । अन्तर्वैश्मिकादयोऽप्यत्र ।

**अन्तर्हत्य** अव्य० अन्तर्+हन–ल्यप् । मध्ये हत्वेत्यर्थे "अन्तरपरिग्रहे" पा० अपरिग्रह एवास्य गतित्वेन समासः परिग्रहे तु न, 'अन्तर्हत्वा गतः हतं परिगृह्येति" सि०कौ० । [तद्वति त्रि० ।

**अन्तर्हास** पु० अन्तरप्रकाशो हासः । गूढ़हास्ये, इत० ।

**अन्तर्हित** त्रि० अन्तर्+धा–क्त । गुप्ते, तिरोहिते च । "अन्तर्हितशब्दार्थे" इति सि०कौ० ।

**अन्तवत्** त्रि० अन्तो नाशः परिच्छेदो वाऽस्य मतुप् मस्य वः । अवश्यनश्वरे "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिण" इति गीता । परिच्छेदयुक्ते सीमावति च । "स हैतानन्तवत उपास्तेऽन्तवतः स लोकान् जयतीति" छ० उ० । "अन्तवतः परिच्छिन्नानिति" भा० । स्त्रियां ङीप् ।

**अन्त(न्ते)वासिन्** पु० अन्ते समीपे वस्तुं शीलमस्य वस–णिनि सप्तम्या वा अलुक् । शिष्ये । स्त्रियां ङीप् । समीपस्थिते त्रि० । [सीमायाम्, नाशसमये च ।

**अन्तवेला** स्त्री अन्तस्था वेलाऽवधिः कालो वा इत० । शेष-

**अन्तशय्या** स्त्री शयनं शय्या शीङ्–भावे क्यप् अन्तस्य नाशार्थं शय्या चतुर्थ्यर्थे इत० । मरणार्थं भूमिशय्यायाम्, तद्धेतुत्वात् श्मशाने च । अन्त एव शय्या निर्व्यापारत्वसादृश्यात् कर्म्म० । मरणे ।

**अन्तसद्** पु० अन्ते निकटे सीदति सद–क्विप् । अन्तेवासिनि शिष्ये । "समुपासते गुरुमिवान्तसद" इति किरा० । समीपगे त्रि० ।

**अन्तस्सलिल** न० अन्तरप्रकाशं सलिलम् । भूमिमध्यस्थे जले "गङ्गाया अन्तस्सलिलवाहित्वान्न दोष" इति रघु० । सुत्वाभावपक्षे अन्तःसलिलमप्यत्र । अन्तर्गतं सलिलं यस्याः । अप्रकाशितजलायां सरस्वतीनद्यां स्त्री । सलिलस्य मध्यम् अव्ययी० । जलमध्ये अव्य० । "अन्तःसलिलमवगाहेतेति" स्मृतिः । [तापे च ।

**अन्तस्ताप** पु० अन्तःस्थितः तापः । चित्ततापे, देहमध्य-

**अन्त(न्तः)स्था** पु० अन्तः स्पर्शोष्मवर्णयोर्मध्ये तिष्ठतीति स्था–क्विप् । यरलवाख्येषु वर्णेषु ते हि कादिमावसानस्पर्शानां शषसहरूपोष्मवर्णमध्यस्थाः । वा विसर्गलोपेऽन्तस्था अपि । "हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् । औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतमिति" पा०शि० । स्था–क । अन्तःस्थोऽप्यत्र मध्यस्थितमात्रे त्रि० । भवादौ गहा० छ । अन्तःस्थीयः मध्यस्थभवे त्रि० ।

**अन्तादि** त्रि० आदिश्च अन्तश्च द्व० राज० वा परनिपातः । आद्यन्तयोः । "अन्तादिवच्चेति" पा० ।

**अन्तानल** पु० अन्तस्य प्रलयस्यानलोवह्निः । प्रलयानले, अन्त्येष्टिकर्म्माङ्गवह्नौ च ।

**अन्तार** पु० अन्तं वनपर्य्यन्तदेशमृच्छति ऋ–अण् उप० । "अधिष्ठातारमन्तारं पशूनां पुरुषं विदुरिति" भारतोक्ते पशुपालके । [चाण्डालादौ तस्य ग्रामान्तस्थत्वात्तथात्वम् ।

**अन्तावशायिन्** पु० अन्ते पर्य्यन्तदेशेऽवशेते अव+शी–णिनि ।

**अन्तावसायिन्** पु० नखकेशानामन्तमवसातुं छेत्तुं शीलमस्य अव+सो–णिनि युक् च । नापिते । अन्ते वृद्धे वयसि अवस्यति निश्चिनोति तत्त्वम् । मुनिभेदे । "अन्ताय स्वतोमार्थं जन्तुनाशाय अवस्यति । प्राणिहिंसके चाण्डालादौ ।

**अन्ति** (का) स्त्री अन्यते संबध्यते अन्त–इ । नटाभिनयनकाले तद्युक्तौ ज्येष्ठभगिन्याम् । स्वार्थे के टापि अन्तिकेत्यपि । सामीप्यार्थे अव्य० "मुग्धप्रभीतवदुपेयतुरन्ति मातोरिति" माघ० "यो नो अग्नेऽभिदासत्यन्ति दूरे पदीष्ट स" इति ऋ० १,७९,११, "अन्ति अन्तिके" भा० । "नही नु वो मरुतो अन्त्यस्मे" ऋ० १,१६७,९ । अस्य सामीप्यार्थत्वात् यदान्तरेण अव्ययीभावे । तत्तदर्थसामीप्ये "उपशावन्तिदेवगिति ऋ० १,१८०,७ ।

**अन्तिक** त्रि० अन्यते संबध्यते सामीप्येन, अन्त–घञ् सोऽस्त्यस्तीति मत्वर्थीयः ठन् । सामीप्यवति । "विप्रान्तिके पितॄन् ध्यायन्निति" "शनैः पिण्डान्तिके पुनरिति" "वसेयुस्ते ग्रहान्तिके" इति च मनुः । "तामन्तिकन्यस्तबलिप्रदीपामिति" रघुः । स्वार्थे ठनि सामीप्ये न० । चूल्ह्याम् न० । औषधिभेदे स्त्री । अन्तं शेषसीमां व्याप्नोति अन्त+कन् । पर्य्यन्तव्यापके त्रि० । "केशान्तिको आह्न-